# ***शब्दब्रह्म***

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।

अर्थात्- न आदिर्निधनं यस्य– अनादिनिधनम् आद्यन्तरहितं तद् ब्रह्म। शब्दस्वरूपं यदक्षरं न क्षरमिति- अक्षरम्, जगति अर्थभावेन विवर्तते। भ्रमवशात् अभिलक्ष्यते। तथैव शब्दब्रह्मापि स्फोटवन्नित्यो विभुश्च।कम्बुग्रीवादिगवत् अर्थस्य बोधो भवति।स्फुटति अभिव्यज्यते वर्णैः इति स्फोटः। चतुर्विधा वाग्भवति- यथा परा, पश्यति, मध्यमा, वैखरी इति। अनेन श्लोकेन च विस्तारयन्ति स्माचार्याः, परा वाङ्मूलचक्रस्थाः पश्यन्ति नाभिसंस्थिताः। हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा। वैखर्या हि क्रृतो नादः परः श्रवणगोचरः इति।

परा- मूलस्थाः। पश्यन्ति मूलधारस्थ नाभिपर्यन्तम् आगच्छताः सा पश्यन्ति वाणी। नाभितः हृदयपर्यन्तमागच्छता सा मध्यमा वाणी। मध्यमा वाणी तु सूक्ष्मतमा जपादौ, वा कर्णपिधाने सति अनुभूयते। वैखरी वाणी-विखरतीति वैखरी, परश्रवणगोचरा भवति। शब्दब्रह्म इति विषये उक्तञ्च भर्तृहरिणा।

**नादै आहित विजायम् अन्त्येन ध्वनिना स्मृतम्।**

**आवृत्तपरिपाकायाम् बुद्धौ शब्दोऽवधार्यते।।**

नाद वृत्तिद्वारा आहित ध्वनिना सह बुद्धौ शब्दोऽवचार्यते।

वैयाकरणदृष्ट्या सूत्रवार्तिक-भाष्यञ्चादिभिः प्रतिपादितं वाक्यमेव साधु भवति। साधुशब्दार्थस्यैव इष्टसिद्धि भवति। इयं सा मोक्षमाणानाम् अह्जिम्मा राजपद्धतिः''इति। अन्यच्च एक शब्दः संयग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति। अपरञ्च अकारस्यार्थशब्दस्य द्वावेतौ ब्राह्मणपुरा। इति आप्तोपदेशानुसारञ्च क्रियमाणे शब्दे ब्रह्मनिष्पादने प्रतिपद्यते। प्रमाणत्वेन तु- यदस्ति – आप्तो नामानुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान् भर्तृहरिणा उक्तञ्च -

**एक एव यदाम्नात भिन्नशक्तिमुपाश्रिता।**

**अपृथक्त्वेऽपि शक्तिभ्यः पृथक्त्वेनैव वर्तते ।।**

।।इति।।